# राष्ट्रियशिक्षानीतिः

# 2020

## क्रियान्वयनम्


केन्द्रीयसंस्कृतविश्वविद्यालयः

नवदेहली

संसदः अधिनियमेन स्थापितः

शिक्षामन्त्रालयभारतसर्वकाराधीनः

# आमुखम्

**"योऽनूचान: स नो महान्"** इति ध्येयवाक्यं स्मारंस्मारम् अयं विश्वविद्यालय: संस्कृतेन संस्कृतस्य संस्कृताय जगद्धिताय च अध्ययनानुसन्धानादि कर्तुं कारयितुं च सर्वथा प्रवृत्त: इति दृढो मे प्रत्यय:। अयं हि विश्वविद्यालय: संस्कृतस्य संरक्षणाय सम्पोषणाय संवर्धनाय प्रचाराय प्रसाराय कटिबद्ध: सन् तत्सम्बद्धशास्त्राणां नैकेषां विषयाणामपि अध्ययनानुसन्धानादि-प्रचारप्रसारद्वारा अतिजवेन व्रजन् दृश्यते। ज्ञानविज्ञानप्रौद्योगिक्या सह वेदवेदाङ्गादिभि: सार्धमन्यानि शास्त्राणि भारतीयदर्शनानि च सम्पूर्णे जगति विलसन्तु तत्प्रभावाच्च सर्वतोमुखिप्रतिभासम्पन्न-भारतीयज्ञानपरम्परासमृद्ध-आधुनिकज्ञानविज्ञान-प्रौद्योगिकिदक्ष-बहुभाषाविद्-सच्चिन्तनशील-नैतिकमूल्ययुक्त-गतिशील-राष्ट्रभक्त-नागरिकस्य निर्माणं भवतु इति ध्येयेन सह केन्द्रीयसंस्कृतविश्वविद्यालय: नवदेहलीस्थ: भारतसर्वकारस्य माननीयप्रधानमन्त्रिण: श्रीनरेन्द्रमोदीमहोदयस्य नेतृत्वे माननीयशिक्षामन्त्रिण: कुलाधिपतेश्च श्रीधर्मेन्द्रप्रधानमहोदयस्य मार्गदर्शने च अहर्निशं प्रगतिपथम् अधिरोहति।

संस्कृतशिक्षायां युगानुकूलता समायोजनीया। शिक्षा तावत् यथा ज्ञानदायिनी संस्काराधायिका तथा भुक्तिकरी अपि भवेत्। अद्यतनानां जीविकामार्गाणां वृत्तिपराणां तत्र समावेश: सुतरामपेक्षित:। संस्कृतमूलानां भारतविद्याशास्त्रानां जीवनोपयोगिनां सन्तुलन- संयोजनेन संस्कृतशिक्षा लोकोपकारिणी लोकमान्या अत एव सर्वजनोपादेया भवति। एतस्यां दिशि राष्ट्रियशिक्षानीते: अनुष्ठानं नितराम् उपकरोति। तदर्थमयं प्रथम: पदनिक्षेप:।

ध्येयस्य लक्ष्यस्य च परिपूर्त्यर्थं भारतसर्वकारस्य राष्ट्रियशिक्षानीते: (2020) अनुपालनं कुर्वन् विश्वविद्यालयोऽयं शैक्षिकसत्र 2022-23 त: मुख्यरूपेण अधोलिखित-कार्ययोजनाया: अनुष्ठानं चिकीर्षति-

- चतुर्वर्षीयस्नातकप्रतिष्ठापाठ्यक्रम: (चतुर्थवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम्)
- एकवर्षीयस्नातकोत्तरपाठ्यक्रम: (चतुर्वर्षीयस्नातकप्रतिष्ठापाठ्यक्रमोत्तीर्णच्छात्राणां कृते)
- पञ्चवर्षीयसंसृष्टस्नातकस्नातकोत्तरपाठ्यक्रम:
- द्विवर्षीयस्नातकोत्तरपाठ्यक्रम: द्वितीयवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम् त्रिवर्षीयस्नातक- पाठ्यक्रमोत्तीर्णच्छात्राणां कृते
- एकैकस्य वर्षस्य अध्ययनानन्तरं प्रमाणपत्रप्रदानविधि:
- बहुविकल्पकप्रवेशनिर्गमविधि: (Multiple entry and exit option)
- इच्छाधारित-विषयग्रहणविकल्पविधि: (CBCS)
- मूलविषयेण सह यथेष्टविषयग्रहणविकल्पविधि:
- अन्त:सम्बद्धविषयग्रहणविधि: (Interdisciplinary)
- बहुविषयग्रहणस्वातन्त्र्यविधि: (Multidisciplinary)
- क्रेडिटसंरक्षणपरिवर्तनविधि: (ABC)
- दक्षतासंवर्धनपाठ्यांशा: (Ability enhancement)
- कौशलसंवर्धनोपाया: (Skill enhancement)

*	नैतिकमूल्याधारितपाठ्यांशा:  (Value based)

*	शास्त्रेतरगतिविधय: (ECA)

*	पारदर्शिपरीक्षाप्रत्यायनमूल्याङ्कनविधि:

**"सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया: सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग् भवेत् इति मन्त्रं स्वीकृत्य उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी: दैवेन देयमिति कापुरुषा वदन्ति"** इति सिद्धान्तमनुपालयन्त: विश्वविद्यालयस्य आचार्या:, अधिकारिण:, कर्मचारिण:, गवेषका: अन्तेवासिनश्च स्वातन्त्र्यमनुभवन्त: सुखेन स्वस्वकर्मणि निरता: भवेयु:। प्राचीनकाले यथा भारतवर्षं विश्वगुरु: आसीत् तथैव अद्यापि भारतीयज्ञानपरम्पराया: आधुनिकप्रौद्योगिकि-माध्यमेन प्रचारं-प्रसारं च कृत्वा भारतवर्षं विश्वगुरु: भवेत्।

शुभावसरेऽस्मिन् राष्ट्रियशिक्षानीतिकार्यगणस्य अध्यक्षस्य आचार्यसर्वनारायणझावर्यस्य इतरेषां च सदस्यानाम् अभिनन्दनानि।

वैशाखशुक्लाष्टमी सोमवासर: संवत् 2079

**प्रो. श्रीनिवासवरखेडी**
कुलपति:
केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली

**परिचयः**

संसदः अधिनियमेन स्थापितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य (प्राक्तन- राष्ट्रियसंस्कृत-संस्थानस्य) नवदेहली-उत्तरप्रदेश-उत्तराखण्ड-हिमाचल-जम्मू-मध्यप्रदेश-राजस्थान-महाराष्ट्र-कर्नाटक-केरल-उत्कल-त्रिपुरा-राज्येषु एकैकः परिसरः उत्तरप्रदेशे च एकम् अनुसन्धानसंस्थानमपि विलसति। अथ च बिहार - झारखण्ड - उत्तरप्रदेश - उत्तराखण्ड - हरियाणा - महाराष्ट्र - तमिलनाडु - केरल - आन्ध्रप्रदेश - राजस्थान - हिमाचलप्रदेश - पश्चिमबङ्गाल - मणिपुर - राज्येषु द्वाविंशति-आदर्शसंस्कृतमहाविद्यालयाः, चत्वारि शोधसंस्थानानि अष्टषष्टिः सम्बद्ध - संस्कृतमहाविद्यालयाश्च सन्ति।

विश्वविद्यालये (i) व्याकरणम् (ii) फलित-ज्योतिषम् (iii) सिद्धान्त-ज्योतिषम् (iv) साहित्यम् (v) धर्मशास्त्रम् (vi) पुराणेतिहासः (vii)वेदभाष्यम् (viii) वेदकर्मकाण्ड-पौरोहित्यम् (ix) न्यायः (x) (xi) सर्वदर्शनम् (xii) अद्वैत-वेदान्तः (xiii) सांख्य-योगदर्शनम् (xiv) जैनदर्शनम् (xv) बौद्धदर्शनम् (xvi) मीमांसा (XVII) रामानुजवेदान्तः (XVIII) रामानन्दवेदान्तः (XIX) माध्ववेदान्तः (XX) पाली च इति शास्त्रीयविषयेषु अध्ययनानुसन्धानं भवति | छात्राणां सौकर्यार्थं हिन्दी-साहित्यम्, अंग्रेजी-साहित्यम्, ओडिया-साहित्यम्, डोगरी-साहित्यम्, मैथिली-साहित्यम्, कन्नड-साहित्यम्, तमिलसाहित्यम् मलयालम-साहित्यम्, बाङ्ग्ला-साहित्यम्, मराठी-साहित्यम्, नेपाली-साहित्यम्, मणिपुरी-साहित्यम्, इतिहासः, अर्थशास्त्रम्,समाजशास्त्रम्,राजनीति-विज्ञानम्, संगणक-विज्ञानम् (कम्प्यूटर साइन्स),पर्यावरणम् इति आधुनिकविषयाश्चापि पाठ्यन्ते।

**ध्येयम्**

स्थापनाकालादेव केन्द्रीयसंस्कृतविश्वविद्यालयः (प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्) वेद-शास्त्र-पुराण-इतिहास-धर्मागम-दर्शन-साहित्य-कला-प्राचीनज्ञानपरम्पराप्रभृतीनां तत्सम्बद्धानां अन्येषां च केषाञ्चन विषयाणाम् अध्ययनानुसन्धानं संरक्षणं सम्पोषणं संवर्धनं च विधातुं प्रवृत्तः वरीवर्ति। अनेन सह संस्कृतपालिप्राकृतभाषासु निबद्ध-बौद्धजैनसाहित्य-दर्शनादीनां संरक्षणे संवर्धने सम्पोषणे प्रचारे-प्रसारे चापि निरतो विद्यते। साम्प्रतिके विज्ञानप्रौद्योगिकियुगे संस्कृत-पालि-प्राकृत-भाषासु निबद्धानि शास्त्राणि, ज्ञानविज्ञानानि, साहित्यकलादीनि, तद्विषयकानुसंधानानि च प्रौद्योगिकिवाहनम् अधिष्ठाय द्रुतगत्या निखिले जगति प्रसरन्तु इति केन्द्रीयसंस्कृतविश्वविद्यालयोऽयं दिदृक्षति।

तद्दिशि प्रयतमानोऽयं विश्वविद्यालयः बहुशास्त्रीय-उच्चशिक्षासंस्थानरूपेण विश्वे ख्यातिं सम्पादयितुमीहते।

**लक्ष्यम्**

भारतराष्ट्रस्य अद्वितीयप्रधानमन्त्रिण: माननीयश्रीनरेन्द्रमोदीमहोदयस्य कुशलनेतृत्वे शिक्षामन्त्रिण: कुलाधिपतेश्च माननीयश्रीधर्मेन्द्रप्रधानमहोदयस्य मार्गदर्शने पौरस्त्य-पाश्चात्योभयविधदर्शनशास्त्रनिष्णातस्य विविधविद्याविशारदस्य कुशलप्रशासकस्य कुलपते: प्रो. श्रीनिवासवरखेडीमहोदयस्य कर्तृत्वे भारतसर्वकारस्य राष्ट्रियशिक्षानीतिमनुपालयन् किं पाठनीयं, कथं पाठनीयम्, छात्रानुगुणं पाठनीयम्, आजीविकानुगुणं पाठनीयम्, कालानुगुणं/ युगानुगुणं पाठनीयम्, किञ्च अपठित/अपरिचितनूतनविषयान् स्वशक्त्या अध्ययनं कृत्वा तद्विषयकज्ञानार्जनं कर्तुं छात्राणां सामर्थ्यसंवर्धनं यथा भवेत् तथाऽपि पाठनीयम् इति भावनाभिरभिषिञ्चित: विश्वविद्यालयोऽयम् अग्रेसरो वरीवर्ति।

अथ च छात्रा: यथेष्टकालं यावद् अध्ययनं कर्तुं, मध्ये विरामं स्वीकर्तुं, पुन: अभीष्टसमये प्रवेशं स्वीकर्तुं, स्वेच्छया विषयचयनं, विषयपरिवर्तनं, विषयान्तरस्य चयनं, नैकविषयाणां चयनं, प्रशिक्षुसेवां, बहुविधसामर्थ्यसंवर्धनं, कौशलविकासञ्च च कर्त्तुं स्वातन्त्र्यमनुभवन्तु इति लक्ष्येण सह अयं विश्वविद्यालय: प्रगतिपथम् अधिजिगमिषति।

**कार्ययोजना-**

2022-23 सत्रे स्नातकप्रथमवर्षे स्नातकोत्तरप्रथमवर्षे विद्यावारिधिप्रथमवर्षे च राष्ट्रियशिक्षानीते: क्रियान्वयनम्।

2023-24 सत्रे स्नातकद्वितीयवर्षे स्नातकोत्तरद्वितीयवर्षे च राष्ट्रियशिक्षानीते: क्रियान्वयनम्।

2024-25 सत्रे स्नातकतृतीयवर्षे राष्ट्रियशिक्षानीते: क्रियान्वयनम्।

2025-26 सत्रे च स्नातकप्रतिष्ठाचतुर्थवर्षे राष्ट्रियशिक्षानीते: क्रियान्वयनम्|

# विषय-सूची


| क्र.सं. | विवरणम् | पृ.सं. |
|---|---|---|
| 1 | अध्ययनकार्यक्रमा: | |
| 2 | अध्येतव्यविषया: | |
| 3 | सत्रम्/सत्रार्धम् | |
| 4 | क्रेडिट | |
| 5 | प्रवेश: | |
| 6 | निर्गम: | |
| 7 | पुन: प्रवेश: | |
| 8 | शास्त्रिप्रथमवर्षे प्रथमसत्रार्धे विषयचयनम् | |
| 9 | शास्त्रिद्वितीयवर्षे द्वितीयसत्रार्धे विषयचयनम् | |
| 10 | शास्त्रिद्वितीयवर्षे तृतीयसत्रार्धे विषयचयनम् | |
| 11 | शास्त्रिद्वितीयवर्षे चतुर्थसत्रार्धे  विषयचयनम् | |
| 12 | शास्त्रितृतीयवर्षे पञ्चमसत्रार्धे विषयचयनम् | |
| 13 | शास्त्रितृतीयवर्षे षष्ठसत्रार्धे विषयचयनम् | |
| 14 | आचार्यप्रथमवर्षे प्रथमसत्रार्धे विषयचयनम् | |
| 15 | आचार्यप्रथमवर्षे द्वितीयसत्रार्धे विषयचयनम् | |
| 16 | आचार्यद्वितीयवर्षे तृतीयसत्रार्धे विषयचयनम् | |

| | | |
|---|---|---|
| 17 | आचार्यद्वितीयवर्षे चतुर्थसत्रार्धे विषयचयनम् | |
| 18 | पाठ्यक्रमे/पत्रसङ्केते प्रयुक्तसंक्षिप्तशब्दविवरणम् | |
| 19 | पञ्चवर्षीयसंसृष्टस्नातकस्नातकोत्तरपाठ्यक्रम: (शास्त्री+आचार्य:) | |
| 20 | चतुर्वर्षीयस्नातकप्रतिष्ठापाठ्यक्रम: (चतुर्थवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम्) शास्त्रीप्रतिष्ठा | |
| 21 | द्विवर्षीयस्नातकोत्तरपाठ्यक्रम: (आचार्यपाठ्यक्रम:) द्वितीयवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम् त्रिवर्षीयस्नातक-पाठ्यक्रमोत्तीर्णच्छात्राणां कृते | |
| 22 | एकवर्षीय स्नातकोत्तरपाठ्यक्रम: (आचार्यपाठ्यक्रम:) चतुर्वर्षीय-स्नातकप्रतिष्ठा-पाठ्यक्रमोत्तीर्णच्छात्राणां कृते | |
| 23 | परीक्षा-मूल्याङ्कनञ्च | |
| 24 | अध्यापकद्वारा कर्तव्यस्य आन्तरिकमूल्याङ्कनस्य कृते निर्देश: | |
| 25 | ग्रेडिंग-व्यवस्था | |
| 26 | परिशिष्टम् 1 (स्वशास्त्रम्) | |
| 27 | परिशिष्टम् 2 (स्वशास्त्रम् + आधुनिकविषय:) | |
| 29 | परिशिष्टम् 3 (संस्कृतभाषादक्षता) | |
| 30 | परिशिष्टम् 4 (अंग्रेजीभाषादक्षता) | |
| 31 | परिशिष्टम् 5 (हिन्दीभाषादक्षता) | |
| 32 | परिशिष्टम् 6 (बहुशास्त्रीयविषय:-आधुनिक:) | |
| 33 | परिशिष्टम् 7 (बहुशास्त्रीयविषय:-परम्परागत:) | |
| 34 | परिशिष्टम् 8 | |
| 35 | परिशिष्टम् 9 | |

1. अध्ययनकार्यक्रमा:

1.1 चतुर्वर्षीयस्नातकप्रतिष्ठापाठ्यक्रम: (चतुर्थवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम्)

1.2 एकवर्षीयस्नातकोत्तरपाठ्यक्रम: (चतुर्वर्षीयस्नातकप्रतिष्ठापाठ्यक्रमोत्तीर्णच्छात्राणां कृते)

1.3 पञ्चवर्षीयसंसृष्टस्नातकस्नातकोत्तरपाठ्यक्रम:

1.4 द्विवर्षीयस्नातकोत्तरपाठ्यक्रम:| द्वितीयवर्षं पूर्णत: शोधकार्यस्य कृते समर्पितम्| (त्रिवर्षीयस्नातक - पाठ्यक्रमोत्तीर्णच्छात्राणां कृते )

2. अध्येतव्यविषया:

(i) व्याकरणम् (ii) फलित-ज्योतिषम् (iii) सिद्धान्त-ज्योतिषम् (iv) साहित्यम् (v) धर्मशास्त्रम् (vi) पुराणेतिहास: (vii)वेदभाष्यम् (viii) वेदकर्मकाण्ड-पौरोहित्यम् (ix) न्यायः (x) (xi) सर्वदर्शनम् (xii) अद्वैत-वेदान्तः (xiii) सांख्य-योगदर्शनम् (xiv) जैनदर्शनम् (xv) बौद्धदर्शनम् (xvi) मीमांसा (XVII) रामानुजवेदान्त: (XVIII) रामानन्दवेदान्त: (XIX) माध्ववेदान्त: (XX) पाली च इति शास्त्रीयविषयेषु अध्ययनानुसन्धानं भवति | छात्राणां सौकर्यार्थं हिन्दी-साहित्यम्, अंग्रेजी-साहित्यम्, ओडिया-साहित्यम्, डोगरी-साहित्यम्, मैथिली-साहित्यम्, कन्नड-साहित्यम्, तमिलसाहित्यम् मलयालम-साहित्यम्, बाङ्ग्ला-साहित्यम्, मराठी-साहित्यम्, नेपाली-साहित्यम्, मणिपुरी-साहित्यम्, इतिहास:, अर्थशास्त्रम्,समाजशास्त्रम्,राजनीति-विज्ञानम्, संगणक-विज्ञानम् (कम्प्यूटर साइन्स), पर्यावरणम् इति आधुनिकविषयाश्चापि पाठ्यन्ते।

## 3. सत्रम्/सत्रार्धम्

3.1 एकस्मिन् सत्रे द्वे सत्रार्द्धे भवेताम्। सत्रार्द्धे च न्यूनतमानि नवतिकार्यदिनानि भवेयु:।

3.2 विषम-सत्रार्द्धं जुलाई त: दिसम्बरमासं यावत्, समसत्रार्द्धं च जनवरी त: जूनमासं यावत् भवेताम्।

## 4. क्रेडिट

4.1 16-20 होराणाम् अध्ययन-अध्यापन-प्रायोगिककार्यादिजन्यशैक्षणिककार्यकाल: = एकं "क्रेडिट" भवेत् । एकसप्ताहस्य प्रशिक्षुता सेवाकाल: Internship/Apprenticeship अपि एकक्रेडिट समो भवेत्।

4.2 अर्जितक्रेडिट ABC (Academic Bank of Credit) द्वारा निर्दिष्टावधिं यावत् स्थास्यन्ति, अर्जितक्रेडिट इत्यस्य अर्जनप्रक्रिया, अवधि:, क्रेडिट इत्यस्य मोचनं (Redemption) यूजीसी (उच्चशिक्षायाम् अकादमिक-बैंक-ऑफ-क्रेडिट (एबीसी) योजना स्थापना संचालनञ्च) विनियम: 2021 इत्यस्य अनुसारेण भवेत्।

4.3 एकेडमिक-बैंक-ऑफ-क्रेडिट्स (एबीसी) मध्ये पञ्जीकरणम् आवश्यकम्|

4.3.1 कस्मिन्नपि पाठ्यक्रमे प्रवेशात् प्राक् छात्रा: एबीसी मध्ये खाताधारका: भवन्तु इति अनिवार्यो भवेत्।

4.3.2 एबीसी इत्यत्र खातां निर्मातुं ते Digi Locker मध्ये पञ्जीकृता: स्यु।

4.3.3 एबीसी इत्यत्र खातां निर्मातुं छात्रा: स्वनाम, स्थानसङ्केतं, प्रमाणपत्रम्, पाठ्यक्रमम् इत्यादि विषयान् पूरयेयु:।

4.3.4 विशिष्ट-आईडी-पासवर्ड इत्यस्य निर्माणं छात्रा: अनिवार्यरूपेण कुर्यु:।

4.3.5 परीक्षाया: परिणामस्य उद्घोषणानन्तरं परीक्षाविभाग: अकादमिक-क्रेडिट-बैंक-खातामध्ये डिजिटल-पोर्टलपटले छात्राणां क्रेडिट अपलोड कुर्यात्।

4.3.6 क्रेडिट इत्यस्य मूल्याङ्कनं सत्यापनञ्च अकादमिक-क्रेडिट-बैंकमाध्यमेन नियमित-अन्तराले यथानियमं भवेत्।

4.3.7 छात्रस्य अर्जित-क्रेडिट तस्य अकादमिकखातामध्ये स्थापितं स्यात्। यदि छात्र: अन्यस्मिन् विश्वविद्यालये पठितुं जिगमिषति तदा संचित-क्रेडिट नूतनसंस्थानस्य खातामध्ये स्थानान्तरितं भवेत्। निर्धारित-क्रेडिटमाध्यमेन छात्र: अर्जितोपाधिं प्राप्तुं शक्नुयात्।

4.3.8 यदि कश्चित् छात्र: क्रेडिट इत्यस्य स्थानान्तरणं चिकीर्षति तदा अग्रिमप्रक्रियायै एबीसी इत्यनेन स: सम्पर्क: साधनीयो भवेत्।

5. प्रवेश:

5.1 अर्हता- प्राक्-शास्त्री, उपशास्त्री, उत्तरमध्यमा वा तत्समकक्षपरीक्षोत्तीर्णा: छात्रा: एन.टी.ए. द्वारा आयोजितपरीक्षामाध्यमेन शास्त्रिपाठ्यक्रमे, शास्त्रिप्रतिष्ठापाठ्यक्रमे वा पञ्चवर्षीयसंसृष्ट-आचार्यपाठ्यक्रमे प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

5.2 शास्त्रिपरीक्षोत्तीर्णा: छात्रा: द्विवर्षीय-आचार्यपाठ्यक्रमे प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

5.3 शास्त्रिप्रतिष्ठापरीक्षोत्तीर्णा: छात्रा: एकवर्षीय-आचार्यपाठ्यक्रमे प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

5.4 शास्त्रिप्रतिष्ठापरीक्षोत्तीर्णा: छात्रा: विद्यावारिधि-पाठ्यक्रमे प्राक्-शोधपरीक्षाद्वारा/यू.जी.सी. नेट/जे.आर.एफ. द्वारा प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

5.5 एकवर्षीय-आचार्यपाठ्यक्रमोत्तीर्णा: छात्रा: विद्यावारिधि-पाठ्यक्रमे प्राक्-शोधपरीक्षाद्वारा/यू.जी.सी. नेट/जे.आर.एफ. द्वारा प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

5.6 द्विवर्षीय-आचार्यपाठ्यक्रमोत्तीर्णा: छात्रा: विद्यावारिधि-पाठ्यक्रमे प्राक्-शोधपरीक्षाद्वारा/यू.जी.सी. नेट/जे.आर.एफ. द्वारा प्रवेशं प्राप्तुम् अर्हा: भवेयु:।

6. निर्गम: -

6.1 कश्चिदपि छात्र: कस्यापि समसत्रार्धस्य परीक्षां प्रदाय निर्गमं कर्तुम् अर्ह: भवेत्। (विद्यावारिधिं विहाय)

6.2 शास्त्रिप्रथमवर्षे निर्गमे अन्तरस्नातकप्रमाणपत्रम् प्राप्तुम् अर्ह: भवेत्।

6.3 शास्त्रिद्वितीयवर्षे निर्गमे अन्तरस्नातकडिप्लोमा-प्रमाणपत्रम् प्राप्तुम् अर्ह: भवेत्।

6.4 शास्त्रितृतीयवर्षे निर्गमे स्नातकउपाधिं प्राप्तुम् अर्ह: भवेत्।

6.5 शास्त्रिचतुर्थवर्षे (प्रतिष्ठापाठ्यक्रमे) निर्गमे स्नातकप्रतिष्ठा इत्युपाधिं प्राप्तुम् अर्ह: भवेत्।

6.6 आचार्यप्रथमवर्षे निर्गमे स्नातकोत्तरडिप्लोमा-प्रमाणपत्रं प्राप्तुम् अर्ह: भवेत्।

6.7 आचार्यद्वितीयवर्षे निर्गमे स्नातकोत्तर-उपाधिं प्राप्तुम् अर्ह: भवेत्।

6.8 एकवर्षीय-आचार्यपाठ्यक्रमे निर्गमे स्नातकोत्तर-उपाधिं प्राप्तुम् अर्ह: भवेत्।

## 7. पुन: प्रवेश:

7.1 कश्चिदपि छात्र: य: पाठ्यक्रमस्य मध्ये निर्गमनं कृतवान् आसीत् स: तस्मिन् अपूर्णपाठ्यक्रमे शास्त्रिकक्षायां त्रिवर्षाभ्यन्तरे विषमसत्रार्द्धे आचार्यकक्षायां वर्षद्वयाभ्यन्तरे विषमसत्रार्द्धे पुन: प्रवेशं प्राप्तुम् अर्ह: भवेत्।

## 8. विषयचयनम्

### 8.1 शास्त्रिप्रथमवर्षम् प्रथमसत्रार्धम्

DSCC1, DSCC2- अत्र प्रथमपरिशिष्टे लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति।

*अपवाद: 1.* य: 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहास: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिप्रथमवर्षे प्रथमसत्रार्धे धर्मशास्त्रस्य DSCC1 DSCC2 स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं न स्वीकर्तुं अर्हति|

*अपवाद: 2.* य: 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिप्रथमवर्षे प्रथमसत्रार्धे 2.9 न्यायस्य DSCC1 DSCC2 स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखिताश्चत्वारो विभागा: वा शिक्षका: स्यु: | यदि चत्वारो विभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु चतुर्षु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 3.* य: 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्त: वा 2.18 रामानन्दवेदान्त: वा 2.19 माध्ववेदान्त: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिप्रथमवर्षे प्रथमसत्रार्धे अद्वैतवेदान्तस्य DCC1 DSCC2 इति स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिता: सर्वे पञ्चविभागा: वा शिक्षका: स्यु: | यदि सर्वे पञ्चविभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

DSE1- अत्र DSCC1, DSCC2 इत्येतेषु गृहीतविषयं विहाय प्रथमपरिशिष्टे-लिखितविषयेषु कस्यापि एकस्य विषयस्य DSE1 इति पत्रं स्वीकर्तुम् अर्हति यदि तस्मिन् परिसरे तस्य विषयस्य शिक्षक: भवेत्|

GE1- अत्र द्वितीयपरिशिष्टे-लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति। शास्त्रिप्रतिष्ठायां प्रविष्ट: छात्र: द्वितीयपरिशिष्टे-लिखितविषयेषु कमपि एकं शास्त्रीयमेव विषयं स्वीकर्तुम् अर्हति

AECC1 संस्कृतभाषादक्षता- **तृतीयपरिशिष्टे** विषया: निर्धारिता:।

AECC2 अंग्रेजीभाषादक्षता- **चतुर्थपरिशिष्टे** विषया: निर्धारिता:।

AEEC1 Windows Operating System and MS Word with Unicode वा **अष्टमपरिशिष्टे** निर्धारितविषया:।

**9. शास्त्रिप्रथमवर्षम् द्वितीयसत्रार्धम्**

**9.1 विषयचयनम्**

DSCC3, DSCC4, DSCC5 अत्र प्रथमपरिशिष्टे-लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

*अपवाद: 4.* य: 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहास: इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: शास्त्रिप्रथमवर्षे द्वितीयसत्रार्धे धर्मशास्त्रस्यैव DSCC3 DSCC4 DSCC5 इति स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं स्वीकर्तुं नार्हति|

*अपवाद: 5.* य: 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: शास्त्रिप्रथमवर्षे द्वितीयसत्रार्धे 2.9 न्यायस्यैव DSCC3 DSCC4 DSCC5 इति स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखितास्त्रयो विभागा: वा शिक्षका: स्यु: | यदि त्रयो विभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु त्रिषु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 6.* य: 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्त: वा 2.18 रामानन्दवेदान्त: वा 2.19 माध्ववेदान्त: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिप्रथमवर्षे द्वितीयसत्रार्धे अद्वैतवेदान्तस्यैव DSCC3 मीमांसाया: DSCC1 DSCC2 इति स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिता: सर्वे पञ्चविभागा: वा शिक्षका: स्यु: | यदि सर्वे पञ्चविभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

GE2 अत्र द्वितीयपरिशिष्टे-लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

SEC1 Value based- गीता, अ.2,श्लो.1-35

SEC2 Skill based Computer Science अत्र **नवमपरिशिष्टे** लिखितविषयेषु कमपि विषयं स्वीकर्तुम् अर्हति।अथवा षोडशोपचारपूजनम्, हवनम् वा संस्कृतानुवादस्य प्रशिक्षणम्।

Internship – अत्र षण्णां सप्ताहानां प्रशिक्षुतासेवा अनिवार्या वर्तते। परिसरस्य Placement Cell इत्यस्य दायित्वं भविष्यति यद् जल-थल-वायुसेना-अधिकारिभि:, विभिन्नन्यास-संचालित-मन्दिरादिसंस्थाधिकारिभि:, सर्वकारै:, विविधविश्वविद्यालयै: विभिन्नकार्यदायिसंस्थाभिश्च वार्तां विधाय Internship इत्यस्य प्रबन्धनं कुर्यात्। यदि एतत्सम्भवो न भवेत् चेत् परिसर: स्वयमेव Internship इत्यस्य प्रबन्धनं कुर्यात्।

## 10. शास्त्रिद्वितीयवर्षम् तृतीयसत्रार्धम्

### 10.1 विषयचयनम्

DSCC6, DSCC7- अत्र प्रथमपरिशिष्टे लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति । यदि परिसरे स: विभाग:भवेत्|

*अपवाद: 7.* य: 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहास: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिद्वितीयवर्षे तृतीयसत्रार्धे धर्मशास्त्रस्यैव DSCC6 DSCC7 इति स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ वा शिक्षकौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं स्वीकर्तुं नार्हति|

*अपवाद: 8.* य: 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिद्वितीयवर्षे तृतीयसत्रार्धे 2.9 अद्वैतवेदान्तस्य DSCC1 DSCC2 इति स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखितास्त्रयो विभागा: वा शिक्षका: स्यु: | यदि त्रयो विभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु त्रिषु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 9.* य: 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्त: वा 2.18 रामानन्दवेदान्त: वा 2.19 माध्ववेदान्त: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिद्वितीयवर्षे तृतीयसत्रार्धे मीमांसाया: DSCC3 रामानुजवेदान्तस्य DSCC1 इति स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिता: सर्वे पञ्चविभागा: स्यु: | यदि सर्वे पञ्चविभागा: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

DSE2- अत्र DSCC इत्येतेषु गृहीतविषयं विहाय प्रथमपरिशिष्टे-लिखितविषयेषु कस्यापि एकस्य विषयस्य DSE2 इति पत्रं स्वीकर्तुम् अर्हति यदि तस्मिन् परिसरे स: विभाग: भवेत्|

GE3- अत्र द्वितीयपरिशिष्टे-लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति।

AECC3 हिन्दीभाषादक्षता -अत्र **पञ्चमपरिशिष्टे** विषया: निर्धारिता:।

AECC4 अंग्रेजीभाषादक्षता - अत्र **चतुर्थपरिशिष्टे** विषया: निर्धारिता:।

AEEC2 HTML+ Web designing वा **अष्टमपरिशिष्टे** निर्धारितविषया:।

## 11. शास्त्रिद्वितीयवर्षम् चतुर्थसत्रार्धम्

### 11.1 विषयचयनम्

DSCC8, DSCC9, DSCC10 अत्र प्रथमपरिशिष्टे लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

*अपवाद: 10.* य: 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहास: इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: शास्त्रिद्वितीयवर्षे चतुर्थसत्रार्धे पुराणेतिहासस्य DSCC1 DSCC2 DSCC3 इति स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं स्वीकर्तुं नार्हति|

*अपवाद: 11.* य: 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: शास्त्रिद्वितीयवर्षे चतुर्थसत्रार्धे 2.9 अद्वैतवेदान्तस्य DSCC3 DSCC4 DSCC5 इति स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखितास्त्रयो विभागा: वा शिक्षका: स्यु: | यदि त्रयो विभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु त्रिषु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 12.* य: 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्त: वा 2.18 रामानन्दवेदान्त: वा 2.19 माध्ववेदान्त: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: शास्त्रिद्वितीयवर्षे चतुर्थसत्रार्धे रामानुजवेदान्तस्य DSCC2 DSCC3 रामानन्दवेदान्तस्य DSCC1 इति स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिता: सर्वे पञ्चविभागा: वा शिक्षका: स्यु: | यदि सर्वे पञ्चविभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

GE4- अत्र द्वितीयपरिशिष्टे लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति ।

SEC3 Value based- गीता, अ.2,श्लो. 36-72

SEC4 Skill based Computer Science अत्र **नवमपरिशिष्टे** लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति ।

अथवा चूडाकरणोपनयनवेदारम्भसमावर्तनसंस्कार-एकादशीव्रतोद्यापनरुद्राभिषेकविषये च प्रशिक्षणम् स्वीकर्तुम् अर्हति।

Internship – अत्र षण्णां सप्ताहानां प्रशिक्षुतासेवा अनिवार्या वर्तते। परिसरस्य Placement Cell इत्यस्य दायित्वं भविष्यति यद् जल-थल-वायुसेना-अधिकारिभिः, विभिन्नन्यास-संचालित-मन्दिरादिसंस्थाधिकारिभिः, सर्वकारैः, विविधविश्वविद्यालयैः एवं विभिन्नकार्यदायिसंस्थाभिश्च वार्तां विधाय Internship इत्यस्य प्रबन्धनं कुर्यात्। यदि एतत्सम्भवो न भवेत् चेत् परिसरः स्वयमेव Internship इत्यस्य प्रबन्धनं कुर्यात्।

## 12. शास्त्रितृतीयवर्षम् पञ्चमसत्रार्धम्

### 12.1 विषयचयनम्

DSCC 11 DSCC12- अत्र प्रथमपरिशिष्टे लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

*अपवाद: 13.* यः 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहासः इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति सः **शास्त्रितृतीयवर्षे पञ्चमसत्रार्धे** पुराणेतिहासस्य DSCC4 DSCC5 इति पत्रं स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ वा शिक्षकौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं स्वीकर्तुं नार्हति|

*अपवाद: 14.* यः 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति सः **शास्त्रितृतीयवर्षे पञ्चमसत्रार्धे** 2.13 सांख्य-योगदर्शनस्य DSCC1 DSCC2 स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखितास्त्रयो विभागाः वा शिक्षकाः स्युः | यदि त्रयो विभागाः वा शिक्षकाः परिसरे न स्युः तर्हि तस्मिन् परिसरे उपरिलिखितेषु त्रिषु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 15.* यः 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्तः वा 2.18 रामानन्दवेदान्तः वा 2.19 माध्ववेदान्तः इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति सः **शास्त्रितृतीयवर्षे पञ्चमसत्रार्धे** रामानन्दवेदान्तस्य DSCC2 DSCC3 स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिताः सर्वे पञ्चविभागाः स्युः | यदि सर्वे पञ्चविभागाः परिसरे न स्युः तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

DSE3- अत्र DSCC इत्येतेषु गृहीतविषयं विहाय प्रथमपरिशिष्टे-लिखितविषयेषु कस्यापि एकस्य विषयस्य DSE3 पत्रं स्वीकर्तुम् अर्हति यदि तस्मिन् परिसरे स: विभाग: भवेत्|

GE5- अत्र द्वितीयपरिशिष्टे लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति।

AECC5- पर्यावरणम्।

AEEC3 संगणकविज्ञानम् **अष्टमपरिशिष्टे** निर्धारितविषया:।

## 13. शास्त्रितृतीयवर्षम् षष्ठसत्रार्धम्

### 13.1 विषयचयनम्

DSCC13, DSCC14, DSCC15 अत्र प्रथमपरिशिष्टे लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

*अपवाद: 16.* य: 2.5 धर्मशास्त्रम् वा 2.6 पुराणेतिहास: इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: **शास्त्रितृतीयवर्षे षष्ठसत्रार्धे** पुराणेतिहासस्य DSCC6 DSCC7 DSCC8 स्वीकर्तुमर्हति | यदि परिसरे उभावपि विषयौ न वर्तेते तर्हि शास्त्रिस्तरे धर्मशास्त्रं वा पुराणेतिहासं स्वीकर्तुं नार्हति|

*अपवाद: 17.* य: 2.9 न्यायः वा 2.12 अद्वैत-वेदान्तः वा 2.13 सांख्य-योगदर्शनम् इति विषयमाश्रित्य शास्त्रिकक्षायां पठति स: **शास्त्रितृतीयवर्षे षष्ठसत्रार्धे** 2.9 सांख्य-योगदर्शनस्य DSCC3 DSCC4 DSCC5 स्वीकर्तुमर्हति | यदि परिसरे उपरिलिखितास्त्रयो विभागा: वा शिक्षका: स्यु: | यदि त्रयो विभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु त्रिषु विषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

*अपवाद: 18.* य: 2.12 अद्वैत-वेदान्तः वा 2.16 मीमांसा वा 2.17 रामानुजवेदान्त: वा 2.18 रामानन्दवेदान्त: वा 2.19 माध्ववेदान्त: इति विषयमाश्रित्य शास्त्रिकक्षायां पठितुमिच्छति स: **शास्त्रितृतीयवर्षे षष्ठसत्रार्धे** माध्ववेदान्तस्य DSCC1 DSCC2 DSCC3 स्वीकर्तुमर्हति| यदि परिसरे उपरिलिखिता: सर्वे पञ्चविभागा: वा शिक्षका: स्यु: | यदि सर्वे पञ्चविभागा: वा शिक्षका: परिसरे न स्यु: तर्हि तस्मिन् परिसरे उपरिलिखितेषु पञ्चविषयेषु शास्त्रिस्तरे प्रवेशो न भवेत्|

GE 6 अत्र द्वितीयपरिशिष्टे लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति।

SEC 5 Value based-ईशावास्योपनिषद्।

SEC 6 Skill based - Computer Science अत्र **नवमपरिशिष्टे** लिखितविषयेषु कमपि विषयं स्वीकर्तुम् अर्हति।अथवा षोडशोपचारपूजनम्, हवनम् संस्कृतानुवादस्य प्रशिक्षणञ्च स्वीकर्तुम् अर्हति।

Internship – अत्र षण्णां सप्ताहानां प्रशिक्षुतासेवा अनिवार्या वर्तते। परिसरस्य Placement Cell इत्यस्य दायित्वं भविष्यति यद् जल-थल-वायुसेना-अधिकारिभिः, विभिन्नन्यास-संचालित-मन्दिरादिसंस्थाधिकारिभिः, सर्वकारैः, विविधविश्वविद्यालयैः एवं विभिन्नकार्यदायिसंस्थाभिश्च वार्तां विधाय Internship इत्यस्य प्रबन्धनं कुर्यात्। यदि एतत्सम्भवो न भवेत् चेत् परिसरः स्वयमेव Internship इत्यस्य प्रबन्धनं कुर्यात्।

## 14. आचार्यप्रथमवर्षम् प्रथमसत्रार्धम्

### 14.1 विषयचयनम्

DSCC16, DSCC17, DSCC18, DSCC19-अत्र प्रथमपरिशिष्टे लिखितविषयेषु कमपि एकं विषयं स्वीकर्तुम् अर्हति वा शास्त्रिकक्षायाः त्रिषु वर्षेषु एकस्य गृहीतविषयस्य GE इत्यस्मिन् पाठ्यक्रमे 12 क्रेडिट्स एवञ्च DSE इत्यस्मिन् पाठ्यक्रमे 12 क्रेडिट्स इति, आहत्य 24 क्रेडिट्स यस्मिन् विषये अर्जिताः स्युः तं विषयमपि अत्र स्वीकर्तुम् अर्हति।

AECC1 बहुशास्त्रीय-आधुनिक-विषयः- **षष्ठे परिशिष्टे** निर्धारितविषयाः।

ECA नाटकम्, एन.सी.सी., क्रीडा, एन.एस.एस., शास्त्रार्थः, क्विज(प्रश्नमञ्चः)-इत्यादयः।

## 15. आचार्यप्रथमवर्षम् द्वितीयसत्रार्धम्

### 15.1 विषयचयनम्

DSCC20, DSCC21, DSCC22, DSCC23 - अत्र प्रथमपरिशिष्टे लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

AECC2 बहुशास्त्रीय-परम्परागत-विषयः- **सप्तमपरिशिष्टे** निर्धारितविषयाः।

Internship – अत्र षण्णां सप्ताहानां प्रशिक्षुतासेवा अनिवार्या वर्तते। परिसरस्य Placement Cell इत्यस्य दायित्वं भविष्यति यद् जल-थल-वायुसेना-अधिकारिभिः, विभिन्नन्यास-संचालित-मन्दिरादिसंस्थाधिकारिभिः, सर्वकारैः, विविधविश्वविद्यालयैः एवं विभिन्नकार्यदायिसंस्थाभिश्च

वार्तां विधाय Internship इत्यस्य प्रबन्धनं कुर्यात्। यदि एतत्सम्भवो नास्ति चेत् परिसर: स्वयमेव Internship इत्यस्य प्रबन्धनं कुर्यात्।

**16.आचार्यद्वितीयवर्षम् तृतीयसत्रार्धम्**

**16.1 विषयचयनम्**

DSCC24 स्वशास्त्रीय-शोधपरकपत्रम्, DSCC25 स्वशास्त्रीय-शोधपरकपत्रम्, DSCC26 स्वशास्त्रीय-शोधपरकपत्रम्, DSCC27 स्वशास्त्रीय-शोधपरकपत्रम् - एतेषु **प्रथमपरिशिष्टे** लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

AEEC पाण्डुलिपिसम्पादनम्।

ECA नाटकम्, एन.सी.सी., क्रीडा, एन.एस.एस., शास्त्रार्थ:, क्विज(प्रश्नमञ्च:)-इत्यादय:।

**17. आचार्यद्वितीयवर्षम् चतुर्थसत्रार्धम्**

**17.1 विषयचयनम्**

DSCC28, DSCC29, DSCC30, एतेषु **प्रथमपरिशिष्टे** लिखितविषयेषु प्रथमसत्रार्द्धे चितं विषयं स्वीकर्तुम् अर्हति।

Dissertation लघुशोधप्रबन्ध:।

ECA नाटकम्, एन.सी.सी., क्रीडा, एन.एस.एस., शास्त्रार्थ:, क्विज(प्रश्नमञ्च:)-इत्यादय:।

18. पाठ्यक्रमे/पत्रसङ्केते प्रयुक्तशब्दविवरणम्

| | |
|---|---|
| DSCC | - Discipline Specific Core Course (परिशिष्टसं. 1) |
| DSE | - Discipline Specific Elective (परिशिष्टसं. 1) |
| GE | - Generic Elective (परिशिष्टसं. 2) |
| AECC | - Ability Enhancement Core Course (संस्कृतभाषादक्षता परिशिष्टसं. 3) (अंग्रेजीभाषादक्षता परिशिष्टसं. 4) (हिन्दीभाषादक्षता परिशिष्टसं. 5) |
| AEEC | - Ability Enhancement Elective Course (बहुशास्त्रीय-आधुनिक-विषय: परिशिष्टसं. 6) (बहुशास्त्रीयपरम्परागतविषय: परिशिष्टसं. 7) (संगणकविज्ञानम् परिशिष्टसं. 8) |
| SEC | - Skill Enhancement Course (संगणकविज्ञानम् परिशिष्टसं. 9) |
| ECA | - Extra Curricular Activities |

19. पञ्चवर्षीयसंसृष्टस्नातकस्नातकोत्तरपाठ्यक्रम: (शास्त्री+आचार्य:)

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रमविवरणम् | क्रेडिट |
|---|---|---|---|---|
| शास्त्रिप्रथमवर्षम् | प्रथमम् | DSCC 1 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 2 | स्वशास्त्रीयविषय: | 4 |
| | | DSE 1 | स्वशास्त्र-सम्बद्ध-चयनितविषय: | 4 |
| | | GE 1 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | AECC 1 | संस्कृतभाषादक्षता | 4 |
| | | AECC 2 | अंग्रेजीभाषादक्षता | 2 |
| | | AEEC 1 | सङ्गणकविज्ञानम् | 2 |
| | | | सत्रार्धस्य योग: | 24 |
| | द्वितीयम् | DSCC 3 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 4 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 5 | स्वशास्त्रीयविषय: | 4 |
| | | GE 2 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | SEC 1 | VALUE BASED (नैतिक-मूल्याधारितम्) गीता, अ.2,श्लो.1-35 | 2 |
| | | SEC 2 | SKILL BASED (कौशलाधारितम्) | 4 |
| | | INTERNSHIP 1 | प्रशिक्षुता सेवा | 6 |
| | | | सत्रार्धस्य योग: | 28 |
| | | | सत्रस्य सम्पूर्णयोग: | 52 |
| निष्क्रमणसमये प्राप्तव्योपाधि: | | | शास्त्रिप्रमाणपत्रम् | |

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रमविवरणम् | क्रेडिट |
|---|---|---|---|---|
| शास्त्रिद्वितीय-वर्षम् | तृतीयम् | DSCC 6 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 7 | स्वशास्त्रीयविषय: | 4 |
| | | DSE 2 | स्वशास्त्र-सम्बद्ध-चयनितविषय: | 4 |
| | | GE 3 | चयनित-स्वशास्त्रेतर-विषय | 4 |
| | | AECC 3 | हिन्दी-भाषा-दक्षता | 2 |
| | | AECC 4 | अंग्रेजी-भाषा-दक्षता | 2 |
| | | AEEC 2 | सङ्गणक-विज्ञानम् | 4 |
| | | | सत्रार्धस्य योग: | 24 |
| | चतुर्थम् | DSCC 8 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 9 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 10 | स्वशास्त्रीयविषय: | 4 |
| | | GE 4 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | SEC 3 | VALUE BASED (नैतिक-मूल्याधारितम्) गीता,अ.2,श्लो.36-72 | 2 |
| | | SEC 4 | SKILL BASED (कौशलाधारितम्) | 4 |
| | | INTERNSHIP 2 | प्रशिक्षुता-सेवा | 6 |
| | | | सत्रार्धस्य योग: | 28 |
| | | | सत्रस्य सम्पूर्णयोग: | 52 |
| निष्क्रमणसमये प्राप्तव्योपाधि: | | | शास्त्रिडिप्लोमा | |

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रम-विवरणम् | क्रेडिट |
|---|---|---|---|---|
| शास्त्रितृतीय-वर्षम् | पञ्चमम् | DSCC 11 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 12 | स्वशास्त्रीयविषय: | 4 |
| | | DSE 3 | स्वशास्त्र-सम्बद्ध-चयनितविषय: | 4 |
| | | GE 5 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | AECC 5 | पर्यावरण-विज्ञानम् | 2 |
| | | AEEC 3 | सङ्गणक-विज्ञानम् | 4 |
| | | | सत्रार्धस्य योग: | 22 |
| | षष्ठम् | DSCC 13 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 14 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 15 | स्वशास्त्रीयविषय: | 4 |
| | | GE 6 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | SEC 5 | VALUE BASED (नैतिक-मूल्याधारितम्) ईशावास्योपनिषद् | 2 |
| | | SEC 6 | SKILL BASED (कौशलाधारितम्) | 4 |
| | | INTERNSHIP 3 | प्रशिक्षुता-सेवा | 6 |
| | | | सत्रार्धस्य योग: | 28 |
| | | | सत्रस्य सम्पूर्णयोग: | 50 |
| निष्क्रमणसमये प्राप्तव्योपाधि: | | | शास्त्रि-उपाधि: | |

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रम-विवरणम् | क्रेडिट |
|---|---|---|---|---|
| आचार्यप्रथम-वर्षम् | प्रथमम् | DSCC 16 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 17 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 18 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 19 | स्वशास्त्रीयविषय: | 4 |
| | | AECC 4 | बहुशास्त्रीय-विषय: (आधुनिक:) | 4 |
| | | ECA 1 | पाठ्येतर-गतिविधय: (नाटकम्, क्विज, शास्त्रार्थ:, एन.एस.एस, एन.सी.सी) | 2 |
| | | | सत्रार्धस्य योग: | 22 |
| | द्वितीयम् | DSCC 20 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 21 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 22 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 23 | स्वशास्त्रीयविषय: | 4 |
| | | AEEC 5 | बहुशास्त्रीय-विषय: (परम्परागत:) | 6 |
| | | INTERNSHIP 4 | प्रशिक्षुता-सेवा | 6 |
| | | | सत्रार्धस्य योग: | 28 |
| | | | सत्रस्य सम्पूर्णयोग: | 50 |
| निष्क्रमणसमये प्राप्तव्योपाधि: | | | आचार्य-डिप्लोमा | |

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रम-विवरणम् | क्रेडिट |
|---|---|---|---|---|
| आचार्यद्वितीय-वर्षम् | तृतीयम् | DSCC 24 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DSCC 25 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DSCC 26 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DSCC 27 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | AEEC 5 | पाण्डुलिपि-सम्पादनम् | 4 |
| | | ECA 2 | पाठ्येतर-गतिविधय: (नाटकम्,क्विज,शास्त्रार्थ:,एन.एस.एस , एन.सी.सी) | 2 |
| | | | सत्रार्धस्य योग: | 22 |
| | चतुर्थम् | DSCC 28 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DSCC 29 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DSCC 30 | शोधपरक-स्वशास्त्रीय-विषय: | 4 |
| | | DISSERTATION | लघुशोधप्रबन्ध: | 6 |
| | | ECA 3 | पाठ्येतर-गतिविधय: (नाटकम्,क्विज,शास्त्रार्थ:,एन.एस.एस , एन.सी.सी) | 2 |
| | | | सत्रार्धस्य कुल | 20 |
| | | | सत्रस्य सम्पूर्णयोग: | 42 |
| निष्क्रमणसमये प्राप्तव्योपाधि: | | | आचार्य-उपाधि: | |

## 20. चतुर्वर्षीयस्नातकप्रतिष्ठाकार्यक्रमः (चतुर्थवर्षं पूर्णतः शोधकार्यस्य कृते समर्पितम्)

| कक्षा | सत्रार्धम् | पत्रसङ्केतसंख्या | पाठ्यक्रमविवरणम् | क्रेडिट |
|---|---|---|---|---|
| शास्त्रिप्रथम-वर्षम् | प्रथमम् | DSCC 1 | स्वशास्त्रीयविषयः | 4 |
| | | DSCC 2 | स्वशास्त्रीयविषयः | 4 |
| | | DSE 1 | स्वशास्त्र-सम्बद्ध-चयनित-विषयः | 4 |
| | | GE 1 | चयनित-स्वशास्त्रेतरविषयः | 4 |
| | | AECC 1 | संस्कृत-भाषा-दक्षता | 4 |
| | | AECC 2 | अंग्रेजी-भाषा-दक्षता | 2 |
| | | AEEC 1 | सङ्गणक-विज्ञानम् | 2 |
| | | | सत्रार्धस्य योगः | 24 |
| | द्वितीयम् | DSCC 3 | स्वशास्त्रीयविषयः | 4 |
| | | DSCC 4 | स्वशास्त्रीयविषयः | 4 |
| | | DSCC 5 | स्वशास्त्रीयविषयः | 4 |
| | | GE 2 | चयनित-स्वशास्त्रेतर-विषयः | 4 |
| | | SEC 1 | VALUE BASED (नैतिक-मूल्याधारितम्)गीता, अ.2,श्लो.1-35 | 2 |
| | | SEC 2 | SKILL BASED (कौशलाधारितम्) | 4 |
| | | INTERNSHIP 1 | प्रशिक्षुता-सेवा | 6 |
| | | | सत्रार्धस्य योगः | 28 |
| | | | सत्रस्य सम्पूर्णयोगः | 52 |
| निष्क्रमणसमये प्राप्तव्योपाधिः | | | शास्त्रिप्रमाणपत्रम् | |

| कक्षा | सत्रार्ध | पत्रकोड | पाठ्यक्रम विवरण | क्रेडिट |
|---|---|---|---|---|
| शास्त्रिद्वितीय-वर्षम् | तृतीयम् | DSCC 6 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 7 | स्वशास्त्रीयविषय: | 4 |
| | | DSE 2 | स्वशास्त्र-सम्बद्ध-चयनितविषय: | 4 |
| | | GE 3 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | AECC 3 | हिन्दी-भाषा-दक्षता | 2 |
| | | AECC 4 | अंग्रेजी-भाषा-दक्षता | 2 |
| | | AEEC 2 | सङ्गणकविज्ञानम् (HTML+Web Designing) | 4 |
| | | | सत्रार्धस्य योग: | 24 |
| | चतुर्थम् | DSCC 8 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 9 | स्वशास्त्रीयविषय: | 4 |
| | | DSCC 10 | स्वशास्त्रीयविषय: | 4 |
| | | GE 4 | चयनित-स्वशास्त्रेतर-विषय: | 4 |
| | | SEC 3 | VALUE BASED (नैतिक-मूल्याधारितम्) गीता,अ.2,श्लो.36-72 | 2 |
